ॐ

# श्रीभद्रकाळ्यष्टकं

घोरे संहारवह्नौ प्रळयमुपगते
याहि कृत्वा श्मशानं
नृत्यत्यन्यूनशक्तिर्ज्जगदिदमखिलं
मुण्डमालाभिरामा
भिद्यत्ब्रह्माण्डभाण्डा पटुतरनिनदै-
रट्टहासैरुदारै-
स्सास्माकं वैरिवर्गं शमयतु तरसा
भद्रदा भद्रकाळी।

मग्ने लोकेंबुराशौ नळिनभवनुता
विष्णुना कारयित्वा
चक्रोत्कृत्तोरुकाण्डं मधुमपि भयदं
कैटभं चातिभीमं
पत्मोत्पत्तेः प्रभूतं भयमपि रिपुतो
याहरत् सानुकंपा
सास्माकं वैरिवर्गं शमयतु तरसा
भद्रता भद्रकाळी।

विश्वत्राणंविधातुं महिषमथ रणे
असुरं भीमरूपं
शूलेनाहत्य वक्षस्यमरततिनुता
पातयन्ति च भूमौ
तस्यासृग्वाहिनीभिर्ज्जगदिदमखिलं
शोणितार्द्रं चकार
सास्माकं वैरिवर्गं शमयतु तरसा
भद्रदा भद्रकाली।

या देवि चण्डमुन्डौ त्रिभुवननळिनी-
वारणौ देवशत्रू
दृष्ट्वा युद्धोत्सवे तौ द्रुततरमभिया-दासिना कृत्तकण्ठौ
कृत्वा तद्रक्तपानोत्सवमदमुदिता
साट्टहासातिभीमा
सास्माकं वैरिवर्गं शमयतु तरसा
भद्रदा भद्रकाळी।

सद्यस्तं रक्तबीजं समरभुवि मुदा
घोररूपानसंख्यान्
रक्तोद्भूतांश्च दैत्यान् गजतुरगरथै-
स्सार्द्धमन्यांस्च दैत्यान्
वक्रे निक्षिप्य दंष्ट्रागुरुतरदशनै-

र्यापचौ शोणितौघं
सास्माकं वैरिवर्गं शमयतु तरसा
भद्रसा भद्रकाळी।

स्थानात् दुष्टैश्च देवैस्तुहिनगिरितटे
संगतैस्संस्तुता या
संख्याहीनैस्समेतं त्रिदशरिपुगणैः
स्यन्दनेभैश्च युक्तं
युद्धे सुंभं निसुंभं त्रिभुवनविपदं
नाशयन्ती जघान
सास्माकं वैरिवर्गं शमयतु तरसा
भद्रदा भद्रकाळी।

शंभोर्न्नेत्रानले या जननमपि जग-
त्त्राणहेतोरयासीत्
भूयस्तीक्ष्नासिधाराविदलितशिरसा
दारुकं चापि हत्वा
तस्यासृकपानतुष्ट्या मुहुरपि कृतव-
त्यट्टहासान् कठोरान्
सास्माकं वैरिवर्गं शमयतु तरसा
भद्रदा भद्रकाळी।

या देवी काळरात्री तुहिनगिरिसुता

लोकमाता धरित्री

वाणी लक्ष्मीश्च माया मनसिजदयिता

चण्डिका भद्रकाळी

चामुण्डा खड्गहस्ता रिपुवनदहना

शोणितास्वादकामा

सा हन्याद्विश्ववन्द्या मम रिपुनिवहं

भद्रदा भद्रकाळी

भद्रकाळ्यष्टकं जप्यं शत्रुसंक्षयकांक्षिणा

स्वर्गापवर्गदं पुण्अं दुष्टग्रहनिवारणं

भद्रे लोकैकवन्द्ये भगवति वरदे

काळि कौमारि कन्ये

नित्ये नीरन्ध्ररूपे निशि शमितभये

देवि नीलांबुदाभे

दंष्ट्राखड्गातिघोरे प्रशमितदनुजे

दारुकासृक्प्रदुष्टे

नम्ये नित्यं नमस्ते कुरु मयि करुणां

वैरिणामाशु नाशं॥

Please send any corrections/suggestion on this document to menonar@yahoo.com